श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अनन्तपद्मनाभाष्टोत्तरशतनामावलिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अनन्तपद्मनाभाष्टोत्तरशतनामावलिः ॥

| | |
|---|---|
| 1 | ओं अनन्ताय नमः |
| 2 | ओं पद्मनाभाय नमः |
| 3 | ओं शेषाय नमः |
| 4 | ओं सप्तफणान्विताय नमः |
| 5 | ओं तल्पात्मकाय नमः |
| 6 | ओं पद्मकराय नमः |
| 7 | ओं पिङ्गप्रसन्नलोचनाय नमः |
| 8 | ओं गदाधराय नमः |
| 9 | ओं चतुर्बाहवे नमः |
| 10 | ओं शङ्खचक्रधराय नमः |
| 11 | ओं अव्ययाय नमः |
| 12 | ओं नवाम्रपल्लवाभासाय नमः |
| 13 | ओं ब्रह्मसूत्रविराजिताय नमः |
| 14 | ओं शिलासुपूजिताय नमः |
| 15 | ओं देवाय नमः |

| | |
|---|---|
| 16 | ओं कौण्डिन्यव्रततोषिताय नमः |
| 17 | ओं नभस्यशुक्लस्थचतुर्दशीपूज्याय नमः |
| 18 | ओं फणेश्वराय नमः |
| 19 | ओं सङ्कर्षणाय नमः |
| 20 | ओं चित्स्वरूपाय नमः |
| 21 | ओं सूत्रग्रन्थिसुसंस्थिताय नमः |
| 22 | ओं कौण्डिन्यवरदाय नमः |
| 23 | ओं पृथ्वीधारिणे नमः |
| 24 | ओं पातालनायकाय नमः |
| 25 | ओं सहस्राक्षाय नमः |
| 26 | ओं अखिलाधाराय नमः |
| 27 | ओं सर्वयोगिकृपाकराय नमः |
| 28 | ओं सहस्रपत्रसम्पूज्याय नमः |
| 29 | ओं केतकीकुसुमप्रियाय नमः |
| 30 | ओं सहस्रबाहवे नमः |
| 31 | ओं सहस्रशिरसे नमः |
| 32 | ओं श्रितजनप्रियाय नमः |
| 33 | ओं बन्धुदुःखहराय नमः |

| | |
|---|---|
| 34 | ओं श्रीमते नमः |
| 35 | ओं भवसागरतारकाय नमः |
| 36 | ओं यमुनातीरसन्दृष्टाय नमः |
| 37 | ओं सर्वनागेन्द्रवन्दिताय नमः |
| 38 | ओं यमुनाराध्यपादाब्जाय नमः |
| 39 | ओं युधिष्ठिरसुपूजिताय नमः |
| 40 | ओं ध्येयाय नमः |
| 41 | ओं विष्णुपर्यङ्काय नमः |
| 42 | ओं चक्षुःश्रवणवल्लभाय नमः |
| 43 | ओं सर्वकामप्रदाय नमः |
| 44 | ओं सेव्याय नमः |
| 45 | ओं भीमसेनामृतप्रदाय नमः |
| 46 | ओं सुरासुरेन्द्रसम्पूज्याय नमः |
| 47 | ओं फणामणिविभूषिताय नमः |
| 48 | ओं सत्त्वमूर्तये नमः |
| 49 | ओं शुक्लतनवे नमः |
| 50 | ओं नीलवाससे नमः |
| 51 | ओं जगद्गुरवे नमः |

| | |
|---|---|
| 52 | ओं अव्यक्तपादाय नमः |
| 53 | ओं ब्रह्मण्याय नमः |
| 54 | ओं सुब्रह्मण्यनिवासभुवे नमः |
| 55 | ओं अनन्तभोगशयनाय नमः |
| 56 | ओं दिवाकरमुनीडिताय नमः |
| 57 | ओं मधूकवृक्षसंस्थानाय नमः |
| 58 | ओं दिवाकरवरप्रदाय नमः |
| 59 | ओं दक्षहस्तसदापूज्यशिवलिङ्गनिविष्टधिये नमः |
| 60 | ओं त्रिप्रतीहारसन्दृश्यमुखनाभीपदाम्बुजाय नमः |
| 61 | ओं नृसिंहक्षेत्रनिलयाय नमः |
| 62 | ओं श्रीभूदुर्गासमन्विताय नमः |
| 63 | ओं मत्स्यतीर्थविहारिणे नमः |
| 64 | ओं धर्माधर्माधिरूपवते नमः |
| 65 | ओं महाभोगायुताय नमः |
| 66 | ओं वार्धितीरस्थाय नमः |
| 67 | ओं करुणानिधये नमः |
| 68 | ओं ताम्रपर्णीपार्श्ववर्तिने नमः |
| 69 | ओं महते नमः |

| | |
|---|---|
| **70** | ओं धर्मपरायणाय नमः |
| **71** | ओं महाभाष्यप्रणेत्रे नमः |
| **72** | ओं नागलोकेश्वराय नमः |
| **73** | ओं स्वभुवे नमः |
| **74** | ओं रत्नसिंहासनासीनाय नमः |
| **75** | ओं स्फुरन्मकरकुण्डलाय नमः |
| **76** | ओं सहस्रादित्यसङ्काशाय नमः |
| **77** | ओं पुराणपुरुषाय नमः |
| **78** | ओं ज्वलद्रत्नकिरीटाढ्याय नमः |
| **79** | ओं सर्वाभरणभूषिताय नमः |
| **80** | ओं नागकन्यावृतप्रान्ताय नमः |
| **81** | ओं दिक्पालपरिपूजिताय नमः |
| **82** | ओं गन्धर्वगानसन्तुष्टाय नमः |
| **83** | ओं योगशास्त्रप्रवर्तकाय नमः |
| **84** | ओं देववैणीकसम्पूज्याय नमः |
| **85** | ओं वैकुण्ठाय नमः |
| **86** | ओं सर्वतोमुखाय नमः |
| **87** | ओं रत्नाङ्गदलसद्बाहवे नमः |

| | |
|---|---|
| **88** | ओं बलभद्राय नमः |
| **89** | ओं प्रलम्बघ्ने नमः |
| **90** | ओं कालिन्दीकर्षणाय नमः |
| **91** | ओं भक्तवत्सलाय नमः |
| **92** | ओं रेवतीप्रियाय नमः |
| **93** | ओं निराधाराय नमः |
| **94** | ओं कपिलाय नमः |
| **95** | ओं कामपालाय नमः |
| **96** | ओं अच्युताग्रजाय नमः |
| **97** | ओं आस्तीकगुरवे नमः |
| **98** | ओं अव्यग्राय नमः |
| **99** | ओं बलदेवाय नमः |
| **100** | ओं महाबलाय नमः |
| **101** | ओं अजाय नमः |
| **102** | ओं वाताशनाधीशाय नमः |
| **103** | ओं महातेजसे नमः |
| **104** | ओं निरञ्जनाय नमः |
| **105** | ओं सर्वलोकप्रतापाय नमः |

| | |
|---|---|
| **106** | **ओं सज्वालप्रलयाग्निमुखाय नमः** |
| **107** | **ओं सर्वलोकैकसंहर्त्रे नमः** |
| **108** | **ओं सर्वेष्टार्थप्रदायकाय नमः** |

॥ इति श्री अनन्तपद्मनाभाष्टोत्तरशतनामावलिः समाप्ता ॥